# Shri Mrityunjayastotram 3

# શ્રીમૃત્યુઞ્જયસ્તોત્રમ્ ૩

## Document Information

Text title : Mrityunjayastotram 3

File name : mRRityunjayastotram3.itx

Category : shiva, stotra

Location : doc_shiva

Author : Traditional

Transliterated by : Ganesh Kandu kanduganesh at gmail.com

Proofread by : Ganesh Kandu kanduganesh at gmail.com, NA

Latest update : October 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# Shri Mrityunjayastotram 3

## શ્રીમૃત્યુઞ્જયસ્તોત્રમ્ ૩

ૐ નમો મૃત્યુઞ્જયાય ।
નન્દિકેશ્વર ઉવાચ -
કૈલાસસ્યોત્તરે શૃઙ્ગે શુદ્ધસ્ફટિકસન્નિભે ।
તમોગુણવિહીને તુ જરામૃત્યુવિવર્જિતે ॥ ૧॥

સર્વાર્થ સમ્પદાધારે સર્વજ્ઞાનકૃતાલયે ।
કૃતાઞ્જલી પુટો બ્રહ્મા ધ્યાનાસીનં સદાશિવમ્ ॥ ૨॥

પપ્રચ્છ પ્રણતો ભૂત્વા જાનુભ્યામવનિઙ્ગતઃ ।
સર્વાર્થસમ્પદાધાર બ્રહ્મા લોકપિતામહઃ ॥ ૩॥

બ્રહ્મોવાચ -
કેનોપાયેન દેવેશ ચિરાયુર્લોમશોઽભવત્ ।
તન્મે બ્રૂહિ મહેશાન લોકાનાં હિતકામ્યયા ॥ ૪॥

શ્રીસદાશિવ ઉવાચ -
શૃણુ બ્રહ્મન્ પ્રવક્ષ્યામિ ચિરાયુર્મુનિસત્તમઃ ।
સઞ્જાતઃ કર્મણા યેન વ્યાધિમૃત્યુવિવર્જિતઃ ॥ ૫॥

તસ્મિન્નેકાર્ણવે ઘોરે સલિલૌઘપરિપ્લુતે ।
કૃતાન્તભયનાશાય સ્તુતો મૃત્યુઞ્જયઃ શિવઃ ॥ ૬॥

તસ્ય સઙ્કીર્તનાન્નિત્યં મુનિર્મૃત્યુવિવર્જિતઃ ।
તમેવ કીર્તયન્ બ્રહ્મન્ મૃત્યુ જેતું ન સંશયઃ ॥ ૭॥

લોમશ ઉવાચ -
દેવાધિદેવ દેવેશ સર્વપ્રાણ ભૃતાંવર ।
પ્રાણિનામસિ નાથસ્ત્વં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૮॥

દેહિનાં જીવભૂતોઽસિ જીવો જીવસ્ય કારણમ્ ।
જગતાં રક્ષકસ્ત્વં વૈ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૯॥

હેમાદ્રિશિખરાકારે સુધાવીચિમનોહર ।
પુણ્ડરીકપરં જ્યોતિર્મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૦॥

ધ્યાનાધાર મહાજ્ઞાન સર્વજ્ઞાનૈકકારણ ।
પરિત્રાતાસિ લોકાનાં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૧॥

નિહતા યેન કાલેન સદેવાસુરમાનુષાઃ ।
ગન્ધર્વાપ્સરસશ્ચૈવ સિદ્ધવિદ્યાધરાસ્તથા ॥ ૧૨॥

સાધ્યાશ્ચ વસવો રુદ્રાસ્તથાશ્વિનિસુતાવુભૌ ।
મરુતશ્ચ દિશો નાગાઃસ્થાવરા જઙ્ગમાસ્તથા ॥ ૧૩॥

જિતઃ સોઽપિ ત્વયા ધ્યાયન્ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૪॥

યે ધ્યાયન્તિ પરાં મૂર્તિં પૂજયન્ત્યમરાદયઃ ।
ન તે મૃત્યુવશં યાન્તિ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૫॥

ત્વમોઙ્કારોઽસિ વેદાનાં દેવાનાં ચ સદાશિવઃ ।
આધારશક્તિઃ શક્તીનાં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૬॥

સ્થાવરે જઙ્ગમે વાપિ યાવત્તિષ્ઠતિ દેહગઃ ।
જીવત્યપત્યલોકોઽયં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૭॥

સોમસૂર્યાગ્નિમધ્યસ્થવ્યોમવ્યાપિન્ સદાશિવ ।
કાલત્રયમહાકાલ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૮॥

પ્રબુદ્ધે ચાપ્રબુદ્ધે ચ ત્વમેવ સૃજસે જગત્ ।
સૃષ્ટિરૂપેણ દેવેશ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯॥

વ્યોમ્નિ ત્વં વ્યોમરૂપોઽસિ તેજઃ સર્વત્ર તેજસિ ।
જ્ઞાનિનાં જ્ઞાનરૂપોઽસિ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૦॥

જગજ્જીવો જગત્પ્રાણઃ સ્રષ્ટા ત્વં જગતઃ પ્રભુઃ ।
કારણં સર્વતીર્થાનાં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૧॥

નેતા ત્વમિન્દ્રિયાણાં ચ સર્વજ્ઞાનપ્રબોધકઃ ।
સાંખ્યયોગશ્ચ હંસશ્ચ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૨॥

રૂપાતીતઃ સરૂપશ્ચ પિણ્ડસ્થપદમેવ ચ ।
ચતુર્યુગકલાધાર મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૩॥

રેચકે વહ્નિરૂપોઽસિ સોમરૂપોઽસિ પૂરકે ।
કુમ્ભકે શિવરૂપોઽસિ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૪॥

ક્ષયઙ્કરોઽસિ પાપાનાં પુણ્યાનામપિ વર્ધનમ્ ।
હેતુસ્ત્વં શ્રેયસાં નિત્યં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૫॥

સર્વમાયાકલાતીત સર્વેન્દ્રિય પરાવર ।
સર્વેન્દ્રિયકલાધીશ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૬॥

રૂપં ગન્ધો રસઃ સ્પર્શઃ શબ્દઃ સંસ્કાર એવ ચ ।
ત્વત્તઃ પ્રકાશ એતેષાં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૭॥

ચતુર્વિધાનાં સૃષ્ટીનાં હેતુસ્ત્વં કારણેશ્વર ।
ભાવાભાવપરિચ્છિન્ન મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૮॥

ત્વમેકો નિષ્કલો લોકે સકલમ્ભુવનત્રયે ।
અતિસૂક્ષ્માતિરૂપસ્ત્વં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૨૯॥

ત્વં પ્રબોધસ્ત્વમાધાર ત્વદ્બીજં ભુવનત્રયમ્ ।
સત્વં રજસ્તમસ્ત્વં હિ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૩૦॥

ત્વં સોમસ્ત્વં દિનેશશ્ચ ત્વમાત્મા પ્રકૃતેઃ પરઃ ।
અષ્ટત્રિંશત્વકલાનાથ મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૩૧॥

સર્વેન્દ્રિયાણામાધારઃ સર્વભૂતગુણાશ્રયઃ ।
સર્વજ્ઞાનમયાનન્ત મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૩૨॥

ત્વમાત્મા સર્વભૂતાનાં ગુણાનાં ત્વમધીશ્વરઃ ।
સર્વાનન્દમયાધાર મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૩૩॥

ત્વં યજ્ઞઃ સર્વયજ્ઞાનાં ત્વં બુદ્ધિર્બોધલક્ષણા ।
શબ્દબ્રહ્મસ્ત્વમોઙ્કારો મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૩૪॥

શ્રીસદાશિવ ઉવાચ -
એવં સઙ્કીર્તયેદ્યસ્તુ શુચિસ્તદ્ગતમાનસઃ ।
ભક્ત્યા શૃણોતિ યો બ્રહ્મન્ ન સ મૃત્યુવશો ભવેત્ ॥ ૩૫॥

ન ચ મૃત્યુભયં તસ્ય પ્રાપ્તકાલં ચ લઙ્ઘયેત્ ।
અપમૃત્યુભયં તસ્ય પ્રણશ્યતિ ન સંશયઃ ॥ ૩૬॥

વ્યાધયો નોપપદ્યન્તે નોપસર્ગભયં ભવેત્ ।
પ્રત્યાસન્નાન્તરે કાલે શતૈકાવર્તને કૃતે ॥ ૩૭॥

મૃત્યુર્ન જાયતે તસ્ય રોગાન્ મુઞ્ચતિ નિશ્ચિતમ્ ।
પઞ્ચમ્યાં વા દશમ્યાં વા પૌર્ણમાસ્યામથાપિ વા ॥ ૩૮॥

શતમાવર્તયેદ્યસ્તુ શતવર્ષં સ જીવતિ ।
તેજસ્વી બલસમ્પન્નો લભતે શ્રિયમુત્તમામ્ ॥ ૩૯॥

ત્રિવિધં નાશયેત્પાપં મનો-વાક્-કાયસમ્ભવમ્ ।
અભિચારાણિ કર્માણિ કર્માણ્યાથર્વણાનિ ચ ।
ક્ષીયન્તે નાત્ર સન્દેહો દુઃસ્વપ્નશ્ચ વિનશ્યતિ ॥ ૪૦॥

ઇદં રહસ્યં પરમં દેવદેવસ્ય શૂલિનઃ ।
દુઃસ્વપ્નનાશનં પુણ્યં સર્વવિઘ્નવિનાશનમ્ ॥ ૪૧॥

ઇતિ શ્રીશિવબ્રહ્મસંવાદે શ્રીમૃત્યુઞ્જયસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Ganesh Kandu kanduganesh at gmail.com, NA

---

*Shri Mrityunjayastotram 3*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*